**Series–A**

Roll No.......................

Total No. of Questions–33] [Total No. of Printed Pages–16

**A–908–A–X–2325**

# SANSKRIT

Time Allowed—3 Hours Maximum Marks—80

परीक्षार्थी यथासम्भव अपने शब्दों में ही उत्तर दें।

प्रत्येक प्रश्न के अंक उसके सामने दिए गए हैं।

**विशेष निर्देश :**

(i) अपनी उत्तर-पुस्तिका के मुख्य पृष्ठ के ऊपर बायीं ओर दिए गए वृत्त में प्रश्न-पत्र सीरीज अवश्य लिखिए।

(ii) प्रश्नों के उत्तर देते समय जो प्रश्न-संख्या प्रश्न-पत्र पर दर्शाई गई है, उत्तर-पुस्तिका पर वही प्रश्न-संख्या लिखना अनिवार्य है।

(iii) उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़िए।

(iv) इस प्रश्न-पत्र में **पाँच** खण्ड हैं। प्रत्येक खण्ड के उत्तर एक ही जगह क्रम से लिखिए।

(v) सभी प्रश्नों के उत्तर प्रश्नानुसार संस्कृत में ही दीजिए।

(vi) लिखावट में सुन्दरता और शुद्धता अनिवार्य है।

(vii) खण्ड-क में दिए गए बहुविकल्पीय प्रश्नों के उत्तर उत्तरपुस्तिका में दी गई OMR Sheet पर ही दीजिए।

## खण्ड-क

### ( बहुविकल्पात्मक-प्रश्नाः )

अधोलिखित-षोडश-प्रश्नानाम् उत्तराणि प्रदत्तेभ्यः विकल्पेभ्यः चिनुत– 16×1=16

1. शेमुषी (द्वितीया भागः) इत्यस्य द्वितीयः पाठः कः?

(a) बुद्धिर्बलवती सदा

(b) विचित्रः साक्षी

(c) सुभाषितानि

(d) भूकम्पविभीषिका।

2. वयोऽनुरोधात् -------------- लालनीयः भवति।

(a) कुटुम्बजनः

(b) पुत्रः

(c) शिशुजनः

(d) न कोऽपि।

3. दुर्बले सुते अधिका कृपा भवति।

(a) पितुः

(b) भ्रातुः

(c) भगवतः

(d) इन्द्रस्य।

4. बकः अविचलः ---------------- इव तिष्ठति।

(a) पिकः

(b) स्थितप्रज्ञः

(c) अहिभुक्

(d) यथासमयम्।

5. 'अवक्रता' इत्यस्य शब्दस्य कोऽर्थः?

(a) वक्रता

(b) मृदुता

(c) सरलता

(d) अज्ञानता।

6. <u>प्राणेभ्योऽपि</u> विशेषतः सदाचारं रक्षेत्।

(a) प्राणेभ्यः + अपि

(b) प्राणेभ्यो + पि

(c) प्राण + एभ्योऽपि

(d) प्राणेभ्य + अपि।

7. पक्षिणां सम्राट्

(a) पक्षिराज

(b) पक्षिसम्राट्

(c) खगराज

(d) खगेश।

8. अहं सायं <u>6.00</u> भ्रमणाय गच्छामि।

(a) षड्वादने

(b) पञ्चवादने

(c) अष्टवादने

(d) नववादने।

9. ---------------- रत्नानि सन्ति।

(a) तिस्रः

(b) त्रयः

(c) त्रीणि

(d) तृतीयम्

10. त्वं किं <u>कर्तुम्</u> इच्छसि?

(a) कर् + तुम्

(b) कृ + तुम्

(c) कृी + तुमुन्

(d) कृ + तुमन्

11. "सः पाठं पठति।" इत्यस्य वाच्यपरिवर्तनं कुरुत–

(a) तया पाठः पठ्यते

(b) तेन पाठः पठ्यते

(c) तेन पाठं पठ्यते

(d) तया पाठं पठ्यते

12. मन्दिरे <u>अनेकानि</u> भक्ताः सन्ति।

(a) अनेकः

(b) अनेके

(c) अनेकाः

(d) अनेकौ।

13. भ्रात्रा–इत्यस्य पद–परिचयम्–

(a) भ्राता शब्दः तृतीया विभक्तिः एकवचनम्

(b) भ्रातरि शब्दः तृतीया विभक्तिः एकवचनम्

(c) भ्रातृ शब्दः तृतीया विभक्तिः एकवचनम्

(d) भ्रातृ शब्दः पञ्चमी विभक्तिः एकवचनम्।

14. पास्यति–इत्यस्य पद–परिचयम्

(a) पा धातोः लट्लकारः प्रथमपुरुषः एकवचनम्

(b) पिब् धातोः लृट्लकारः प्रथमपुरुषः एकवचनम्

(c) पा धातोः लृट्लकारः प्रथमपुरुषः एकवचनम्

(d) पिब् धातोः लट्लकारः प्रथमपुरुषः एकवचनम्।

15. यथा राजा ---------- प्रजा।

(a) अधुना

(b) तथा

(c) कदा

(d) बिना।

16. संस्कृते ---------- पुरुषा: सन्ति।

(a) त्रय:

(b) चत्वार:

(c) पञ्च

(d) षड्।

## खण्ड-ख

## ( अपठित-अवबोधनम् )

17. अधोलिखितम् अनुच्छेदम् अधिकृत्य निर्देशित-प्रश्नानाम् उत्तराणि लिखत।

अस्माकं देश: भारतम् अस्ति। अस्य राजधानी नवदेहली अस्ति। अस्माकं देशे विविधा: संस्कृतय: सन्ति। हिमालय: अस्य मुकुटम् अस्ति। समुद्र: अस्य पादप्रक्षालनं करोति। अस्माकं हृदये भावात्मकी एकता विद्यते। भारतभूमि: अस्माकं माता अस्ति। अत एव उच्यते– ''जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।''

(1) एक पदेन उत्तरत–

(क) भारतस्य राजधानी का अस्ति? 1

(ख) क: भारतस्य पादप्रक्षालनं करोति? 1

(2) पूर्णवाक्येन उत्तरत–

अस्माकं हृदये कीदृशी एकता विद्यते? 1

(3) निर्देशानुसारम् उत्तरत–

(क) 'अस्माकं देशे विविधाः संस्कृतयः सन्ति' – अत्र क्रियापदं किम्? 1

(ख) माता-इत्यस्य पर्यायपदं किं प्रयुक्तम्? 1

18. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारित-प्रश्नानाम् उत्तराणि लिखत।

मनसा वाचा कर्मणा च परेषाम् उपकारः 'परोपकारः' कथ्यते। जगति परोपकारेण समं किमपि श्रेष्ठं पुण्यं न विद्यते। महर्षिः दधीचिः परोपकाराय एव स्व-अस्थीनि दत्तवान्। परोपकारिणः दीनेभ्यः दानम् निर्धनेभ्यः धनं वस्त्रहीनेभ्यः वस्त्रं दत्त्वा प्रसन्नाः भवन्ति। प्रकृतिरपि परोपकारस्यैव शिक्षां ददाति। परोपकारार्थम् एव सूर्यः तपति, वृक्षाः फलानि वितरन्ति, नद्यः वहन्ति, गावश्च दुहन्ति।

(1) परोपकारेण समं किं न विद्यते?

(एकपदेन उत्तरत) 1

(2) परोपकाराय: कः स्व-अस्थीनि दत्तवान्?

(पूर्णवाक्येन लिखत) 1

(3) गद्यांशस्य उचितं शीर्षकं लिखत। 1

(4) गद्यांशं पठित्वा तृतीयांशतुल्यं सारं लिखत। 2

## खण्ड-ग

## ( रचनात्मक-कार्यम् )

19. मञ्जूषात: पदानि विचित्य रिक्तस्थानानि पूरयित्वा प्रधानाचार्यस्य कृते विद्यालये प्रवेशाय प्रार्थनापत्रं लिखत। 10×½=5

सविनयम्, दूरे, सधन्यवाद:, मान्यवर, गृहे, प्रदाय, प्रधानाचार्यमहोदया:, दशमकक्षायाम्, विद्यालये, आज्ञाकारी

सेवायाम्

श्रीमन्त: (i) --------------

राजकीय वरिष्ठ-माध्यमिक-विद्यालय

अ.ब.स.

(ii) --------------

(iii) ------- निवेदनम् इदम् अस्ति यत् अहं (iv) ----------- 95% अंकान् प्राप्य उत्तीर्ण:। अस्माभि: स्वनूतने (v) ------------------- गतदिवसे एव प्रवेश: कृत:। मम गृहं पूर्व विद्यालयात् पञ्चदशंकोशपर्यन्तं (vi) --------------------- अस्ति। अहं विज्ञानक्षेत्रे भवताम् (vii) --------------- प्रवेष्टुम् इच्छामि। कृपया मह्यम् स्वीकृतिं (viii) ------------- अनुगृह्णन्तु।

(ix) ----------

भवताम् (x) ---------------- शिष्य:

क.ख.ग.।

20. अधोलिखितेषु विषयेषु **एकं** विषयम् अधिकृत्य संस्कृत-भाषायां लघुनिबन्धं लिखत– 5

(क) मम मित्रम्

(ख) स्वतन्त्रता दिवसः

(ग) उद्यानम्।

## खण्ड-घ

## (अनुप्रयुक्तम्-व्याकरणम्)

21. अधोलिखित-वाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं लिखत। 5×1=5

(क) रामः कन्दुकम् <u>आ+नी+ल्यप्</u> क्रीडति।

(ख) सः पुस्तकं <u>दत्त्वा</u> क्रीडति।

(ग) <u>लिख् + शतृ</u> बालकः पठति।

(घ) बालकः <u>हसितवान्</u>।

(ङ) कालिदासः <u>कीर्ति+मतुप्</u> आसीत्।

22. अधोलिखितानां कालबोधक-शब्दानां संस्कृत-पदेषु परिवर्तनं कुरुत। 3×1=3

(क) 5:00

(ख) 8:15

(ग) 10:30.

23. अधोलिखित-पदेषु त्रयाणां पदानां सन्धिपदं विच्छेदपदं वा लिखत। 3×1=3

(क) सच्चित्

(ख) मनोरथः

(ग) प्रकृतिः + एव

(घ) अन्यः + अपि।

24. अधोलिखित-वाक्येषु त्रयाणां वाक्यानां वाच्यस्य नियमानुगुणं समुचितं वाच्य परिवर्तनं कुरुत। 3×1=3

(क) सः रोटिकां खादति।

(ख) अहं कार्यं करोमि।

(ग) छात्रेण ग्रन्थः पठ्यते।

(घ) गायकेन गीतः गीयते।

25. अधोलिखित-पदेषु चतुर्पदानां समुचितं पद-परिचयं लिखत। 4×½=2

माम्, रामः, कस्मात्, पास्यति, लिखानि, अतिष्ठत्।

26. अधोलिखित-वाक्येषु लिङ्गाधारित-संख्यावाचक-पदानि प्रदत्तेभ्यः विकल्पेभ्यः चिनुत। 4×½=2

(क) तस्य ------------ भ्रातरौ स्तः। (द्वौ/द्वे/द्वा)

(ख) मम हस्ते ----------- पुस्तकानि सन्ति।

(तिस्रः/त्रीणि/त्रयः)

(ग) --------------- पुरुषार्थाः सन्तिः।

(चत्वारि/चतस्रः/चत्वारः)

(घ) --------- माला अस्ति। (एका/एकः/एकम्)

27. अधोलिखित-वाक्येषु रेखाङ्कित-पदानां समस्तपदं विग्रहपदं वा प्रदत्त-विकल्पेभ्यः चिनुत। 4×½=2

(क) उपग्रामम् नदी वहति।

(ख) शरणम् आगतः तु सदैव रक्षणीयः।

(ग) सीतारामौ वनम् अगच्छताम्।

(घ) तडागः नीलोत्पलैः शोभते।

28. अधोलिखित-अशुद्ध-वाक्यानाम् अशुद्धि-संशोधनं कुरुत। 4×½=2

(क) सा गायकः अस्ति।

(ख) अहं पत्रं लिखति।

(ग) शिवं नमः।

(घ) पिता पुत्रं धनं ददाति।

29. मञ्जूषातः अव्यय-पदानि विचित्य रिक्तस्थानानि पूरयत।

अत्र, सदा, अपि, एव $4 \times \frac{1}{2} = 2$

(क) अहं पठामि त्वम् ------------- पठ।

(ख) ------------- जीवनं दुर्वहम् अस्ति।

(ग) ------------- समयस्य सदुपयोगः करणीयः।

(घ) सत्यम् ------------- जयते।

## खण्ड-ङ

## (पठित-अवबोधनम्)

30. पठित-गद्य-पद्य-आधारित-अवबोधन-कार्यम्-

(अ) अधोलिखित-अनुच्छेदं अधिकृत्य निर्देशित-प्रश्नानाम् उत्तराणि लिखत।

अस्ति देउलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यक-कार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रं ददर्श। सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्ट्र्यात् पुत्रौ चपेटया प्रहृत्य जगाद- "कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः? अयमेकस्तावदविभज्य भुज्यताम्। पश्चाद् अन्यो द्वितीयः कश्चिल्लक्ष्यते।"

(1) एक पदेन उत्तरत–

(क) देऊलाख्यः कः अस्ति? 1

(ख) पितुर्गृहं प्रति का चलिता? 1

(2) पूर्णवाक्येन उत्तरत–

बुद्धिमती कीदृशे मार्गे व्याघ्रं ददर्श? 1

(3) निर्देशानुसारम् उत्तरत–

(क) 'पितुर्गृहम्' - इत्यस्य सन्धिविच्छेदं कुरुत। 1

(ख) 'मार्गे गहनकानने'–अत्र विशेष्यपदं किम्? 1

(आ) अधोलिखितम् पद्यांशम् अधिकृत्य निर्देशित–प्रश्नानाम् उत्तराणि लिखत– https://www.hpboardonline.com

आलस्यं हि मनुष्याणां, शरीरस्थो महान् रिपुः।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति।।

(1) एक पदेन उत्तरत–

(क) शरीरस्थः रिपुः कः अस्ति? 1

(ख) आलस्यं केषां रिपुः अस्ति? 1

(2) पूर्णवाक्येन उत्तरत–

(क) केन समः बन्धुः नास्ति? 1

(3) निर्देशानुसारम् उत्तरत–

(क) 'कृत्वा'– अत्र कः प्रत्ययः प्रयुक्तः? 1

(ख) 'रिपुः'–इत्यस्य विलोमपदं किं प्रयुक्तम्? 1

31. पठित–गद्य–पद्ययोः हिन्दी भाषायाम् अनुवादः।

(अ) अधोलिखित–गद्यांशयोः कस्यचिद् **एकस्य** हिन्दी–भाषायाम् अनुवादं लिखत। 3

(क) कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणां कुर्वन्नासीत्। तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत्। अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत। सः ऋषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात। क्रुद्धः कृषीवलः तमुत्थापयितुं बहुवारम् यत्नमकरोत्। तथापि वृषः नोत्थितः।

(ख) पदातिक्रमेण संचलन् सायं समयेऽप्यसौ गन्तव्याद् दूरे आसीत्। 'निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा', एवं विचार्य स पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं कञ्चिद् गृहस्थमुपागतः। करुणापरो गृही तस्मै आश्रयं प्रायच्छत्।

(आ) अधोलिखित-पद्यांशयोः कस्यचिद् **एकस्य** पद्यांशस्य हिन्दीभाषायाम् अनुवादं लिखत। 3

(क) त्यक्त्वा धर्मप्रदां वाचं, परुषां योऽभ्युदीरयेत्।
परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः।।

(ख) एकेन राजहंसेन या शोभा सरसो भवेत्।
न सा बकसहस्रेण परितस्तीरवासिना।।

32. रेखाङ्कितपदमाधृत्य अधोलिखित-वाक्यानां प्रश्न-निर्माणं कुरुत। 4×½=2

(क) मालाकारः <u>तोयैः</u> तरोः पुष्टिं करोति।

(ख) भृंगाः <u>रसालमुकुलानि</u> समाश्रयन्ते।

(ग) <u>व्याघ्रं</u> दृष्ट्वा शृगालः अवदत्।

(घ) <u>भूकम्पकारणं</u> विचारणीयं तिष्ठति।

33. विलोमपदानाम् उचितम् मेलनम् कुरुत- 4×½=2

| | |
|---|---|
| (क) सम्पन्नम् | सुचिरेणैव |
| (ख) ध्वस्तभवनेषु | विपन्नम् |
| (ग) निर्माय | नवनिर्मितभवनेषु |
| (घ) क्षणेनैव | विनाश्य। |